# श्रीश्री-
# गौरगोविन्दार्चनस्मरणपद्धतिः

श्रीगोपालगुरुगोस्वामिकृता

July 30, 2005

श्रीश्रीगुरुगौराङ्गौ जयतः

अथ श्रीकृष्णस्य स्वरूपं निरूप्यते —

**श्रीकृष्णस्तु स्वयंरूपो भेदाः सर्वे ततोऽखिलाः।**
**प्रादुर्भूतास्ततः कृष्ण उपास्येषु वरः स्मृतः॥ १॥**

यथा ब्रह्मसंहितायाम् (५.१)

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्वकारणकारणम्॥ इति॥ २॥

**नन्दनन्दन एवायं सर्वशास्त्रेषु सम्मतः॥ ३॥**

यथा श्रीगौतमीयतन्त्रे दशाक्षरकथने (२०.२१)

गोपीं तु प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः।
अनयोराश्रयो व्याप्त्या कारणत्वेन चेश्वरः॥ ४॥
सान्द्रानन्दं परं ज्योतिर्वल्लभत्वेन कथ्यते।
अथवा गोपी प्रकृतिर्जनस्तस्यांशमण्डलम्॥ ५॥
अनयोर्वल्लभः प्रोक्तः स्वामी कृष्णाख्य ईश्वरः।
कार्यकारणयोरीशः श्रुतिभिस्तेन गीयते॥ ६॥
अनेकजन्मसिद्धानां गोपीनां पतिरेव वा।
नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धनः॥ ७॥

तथा च दशमे ब्रह्मस्तुतौ (१०.१४.१)

नौमीड्य तेऽभ्रवपुषे तडिदम्बराय
गुञ्जावतंसपरिपिच्छलसन्मुखाय।

वन्यस्रजे कवलवेत्रविषाणवेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय॥ इति॥ ८॥

**श्रीकृष्णस्तु स्वयंरूपः प्रादुर्भूतो व्रजेऽभवत्।**
**नन्दगेहे शुचिरसं भक्तेभ्यो दातुमुन्नतम्॥ ९॥**

**भक्तेभ्यः श्रुत्यादिभ्य इत्यर्थः।**

यथा बृहद्वामनपुराणे

गायत्रीमुनिदेवेभ्यो दातुं शुचिरसं निजम्।
नन्दगेहे स्वयं कृष्णो व्रजे प्रादुर्बभूव ह॥ इति॥ १०॥

**गायत्री व्रजे गोपीत्वं प्राप्तेति विष्णुपुराणे कथितम्।**

तद्यथा

ब्रह्मलोओकात्समागत्य व्रजे गायत्र्यजायत।
श्रीकृष्णस्य महागूढमुपबोक्तुं रसं शुचिम्॥ इति॥ ११॥

गायत्री च तत्र जाता इति पाद्मे सृष्टिखण्डे (१७.१७.१९)

यथा ब्रह्मणो गोपकन्यारूपाया गायत्र्या उद्वाहे गोपेषु श्रीविष्णुवचनम्

मया ज्ञात्वा ततः कन्या दत्ता चैषा विरिञ्चये।
युष्माकं च कुले चाहं देवकार्यार्थसिद्धये।
अवतारं करिष्यामि मत्कान्ता तु भविष्यति॥ इति॥ १२॥

**आदौ कृष्णस्ततो माया युग्मं प्रादुरभूद्व्रजे।**
**कन्यामादाय मथुरां वासुदेवे गते सति।**
**प्रादुर्भूतं नन्दसुतं वसुदेवसुतोऽविशत्॥ इति॥ १३॥**

यथा बृहद्विष्णुपुराणे —

श्रीकृष्णे मायया सार्द्धं यशोदापुरतो गते।
प्राकाश्यं मोहिताः सर्वे बभूवुर्व्रजवासिनः॥ १४॥
मथुरायाः सुतं गृह्णन्नागत्यानकदुन्दुभिः।
नन्दस्य सदनं गत्वाऽपश्यत् कन्यां न वै सुतम्॥ १५॥
स्वसुतं तत्र संस्थाप्य कन्यामादाय निर्गते।
वसुदेवे वासुदेवः प्राविशन्नन्दनन्दनम्॥ १६॥
तदा व्रजालयाः सर्वे बभूवुः प्राप्तचेतसः।
दिशः प्रसेदुर्मरुतो ववुः पुण्याः सुखप्रदाः॥ १७॥
मेघा विच्छिन्नतां याताश्चन्द्रोऽभून्निर्मलोदयः।
निर्मलास्तारकाः सर्वा ग्रहाश्च गगनेऽभवन्॥ १८॥
तदानन्दपरो नन्दो ब्राह्मणैर्वेदपारगैः।
कारयामास विधिना जातकर्मात्मजस्य च॥ इति॥ १९॥

यथा श्रीदशमे (१०.५.१-३) —

नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः।
आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतः॥ २०॥
वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य च।
कारयामास विधिवत्पितृदेवार्चनं तथा॥ २१॥
धेनूनां नियुते प्रादाद्विप्रेभ्यः समलङ्कृते।
तिलाद्रीन् सप्तरत्नौघशातकुम्भाम्बरावृतान्॥ २२॥

तथा च श्रीकृष्णामृते (७३३-७३५) —

केचिद्भागवताः प्राहुरेवमेते पुरातनाः।
व्यूहो हरेर्भवेदाद्यो गृहेष्वानकदुन्दुभेः॥ २३॥
गोष्ठे तु मायया सार्द्धं श्रीलीलापुरुषोत्तमः।

गत्वा यदुवरो गोष्ठं तत्र सूतिगृहं विशन्॥ २४॥
कन्यामेव परं वीक्ष्य तामादायाव्रजत्पुरम्।
प्राविषद्वासुदेवस्तु श्रीलीलापुरुषोत्तमम्॥ २५॥
एतच्चातिरहस्यत्वान्नोक्तं तत्र कथाक्रमे।
किन्तु क्वचित्प्रसङ्गेन प्रोच्यतेऽत्र शुकादिभिः॥ इति॥ २६॥

यथा दशमे (१०.५.१) —

नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः॥ २७॥

(१०.६.४३) —

नन्दः स्वपुत्रमादाअय प्रेत्यागतमुदारधीः॥ २८॥

(१०.९.२१) —

नायं सुखापो भगवान् देहिनां गोपिकासुतः॥ इति॥ २९॥

यथा तत्रैव श्रीब्रह्मणः स्तवे (१०.१४.१) —

वन्यस्रजे कवलवेत्रविषाणवेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय॥ इति॥३०॥

**व्यूहो नन्दात्मजस्याद्यो वसुदेवग्,र्हेऽभवत्।**
**प्रकाशश्चेति सिद्धान्तः पुराणेषु विनिश्चितः॥ ३१॥**

**भूभारहरणार्थाय याच्ञया दिवौकसाम्।**
**क्षीराब्धिशायी तत्रैवाविष्टोऽभूदिति निश्चितम्॥ ३२॥**

यथा श्रीदशमे नन्दं प्रति श्रीगर्गवाक्यम् (१०.८.१४) —

प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः॥ इति॥ ३३॥

तथा च श्रीकृष्णामृते (७२१-२२) —

यद्विलासो महाश्रीशः श्रीलीलापुरुषोत्तमः।
आविर्बुभूषुरत्राविष्कृत्य सङ्कर्षणं पुरः।
अन्तःस्थिताविष्कर्तव्यतदन्यव्यूह ईश्वरः॥ ३४॥
हृदये प्रकटस्तस्य भवत्यानकदुन्दुभेः।
भूमिभारनिवाराय देवानामभयाय च॥ ३५॥
द्वापरस्यावसानेऽस्मिन्नष्टाविंशचतुर्युगे।
क्षीराब्धिशायियद्रूपमनिरुद्धतया स्मृतम्॥ ३६॥
तदिदं हृदयस्थेन रूपेणानकदुन्दुभेः।
ऐक्यं प्राप्य ततो गच्छेत्प्राकट्यं देवकीहृदि॥ इति॥ ३७॥

**आविर्भावो मनस्येव कृष्णस्यात्मजता मतः।**
**देवक्या वसुदेवस्य तथा नन्दयशोदयोः॥ ३८॥**

तथा श्रीदशमे (१०.२.१६) —

आविवेशांशभागेन मन आनकदुन्दुभेः॥ इति॥ ३९॥

(१०.२.१८) —

दधार सर्वात्मकमात्मभूतं
काष्ठा यथानन्दकरं मनस्तः॥ इति॥ ४०॥

ब्रह्मसंहिता-टीकायां (५.१) श्रीजीवगोस्स्वामिचरणैरुक्तम् —

आत्मजत्वं हि तस्य श्रीवसुदेवस्य मनस्याविर्भूतत्वमेव मतम्; यथा श्रीदेवक्या अपि श्रीव्रजेश्वरयोरपि तथासीदेव, फलेन फलकारणमनुमीयते इति श्रीभगवत्प्रादुर्भावस्य पूर्वाव्यवहितकाले व्यापितया सर्वत्र दर्शनात्। किन्त्वात्मनि तस्याविर्भावे सत्यप्यात्मजत्वाय पितृभावमयं शुद्धं महाप्रेमैव प्रयोजकम्। यथा ब्रह्मणः

सकाशाद्वराहदेवस्याविर्भावे सत्यपि परस्परं तथा दर्शनाभावात्; तथा नृसिंह-देवस्तम्भयोरपि। न च वक्तव्यमुदरप्रवेशे सति पुत्रत्वं स्यात्; परीक्षिद्रक्षणार्थं तन्मातुरुदरे प्रविष्टे च तयोस्तादृशव्यवहाराभावात्। तस्माद्वात्सल्याभिधप्रेमैव पुत्रत्वे कारणम्; तादृशं शुद्धं प्रेम तु श्रीव्रजेश्वरयोरेव, श्रीवसुदेवदेवक्योस्तु परमैश्वर्यज्ञानं प्रतिबन्धकम्। इति

यथा श्रीकृष्णामृते (७३२) —

असमोर्द्ध्वेन भगवान् वात्सल्येन व्रजेशयोः।
सुतत्वेनैव स तयोरात्मानं वेत्ति सर्वथा॥ ४१॥

**प्रकटाप्रकटा चेति कृष्णलीला द्विधा मता।**
**तया धामत्रये कृष्णो विहरत्येव सर्वदा॥ ४२॥**
**धामत्रयं व्रजं मधुपुरी द्वारावतीति च।**
**कृष्णेन प्रकटा लीला या या धामत्रये कृताः।**
**तास्ताः श्रीदशमस्कन्धे वर्णिताः सन्ति कृत्स्नशः॥ ४३॥**

**अप्रकटलीलायां व्रजे कृष्णस्य सदा विहारो।**

यथा स्कान्धे श्वेतद्वीपपतेरुक्तिः —

अस्ति मे परमं रूपं यदंशात्सम्भवो मम।
तन्नित्यं रमते यत्र वल्लवीगणवेष्टितम्॥ ४४॥
भूलोके भारते वर्षे माथुरे मण्डले शुभे।
भूमिः पवित्रातितरां तत्र वृन्दावनं महत्॥ ४५॥
वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः।
वृन्दावनान्तरगतः सरामो बालकैर्वृतः॥ ४६॥

यथा च सनत्कुमारसंहितायाम् (पाद्मे च पातालकण्डे ५२तमाध्याये) —

दासाः सखायः पितरौ प्रेयस्यश्च हरेरिह।
सर्वे नित्या मुनिश्रेष्ठ तत्तुल्यगुणशालिनः॥ ४७॥
यथा प्रकटलीलायां पुराणेषु प्रकीर्तिताः।
तथा ते नित्यलीलायां सन्ति वृन्दावने भुवि॥ ४८॥
गमनागमने नित्यं तथैव वनगोष्ठयोः।
गोचारणं वयस्यैश्च विनासुरविघातनम्॥ ४९॥
परकीयाभिमानिन्यस्तथास्य च प्रिया जनाः।
प्रच्छन्नेनैव भावेन रमयन्ति निजं प्रियम्॥ इति॥ ५०॥

**मधुपुर्यामप्रकटलीलायां श्रीकृष्णस्य सदा विहारो**

यथा पाद्मे (पातालखण्डे) —

अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी।
दिनमेकं निवासेन हरौ भक्तिः प्रजायते॥
वसुदेवसुतो यत्र सदा तिष्ठति कंसहा॥ इति॥ ५१॥

**द्वारकायामप्रकटलीलायां श्रीकृष्णस्य विहारो**

यथा श्रीकृष्णामृते (७७३-७७५) —

लीलां चाप्रकटां तत्र द्वारवत्यां चिकीर्षुणा।
स्वयं प्रकाश्यते तेन मुनिशापादिकैतवं॥ ५२॥
देवाद्यंशावतारेण ये च वृष्णिष्ववातरन्।
क्षीराब्धिशायिरूपस्तैः सार्द्धं स्वपदमाप्नुयात्॥ ५३॥
नित्यलीलापरिकरा ये स्युर्यदुवरादयः।
तैः सार्द्धं भगवान् कृष्णो द्वारवत्यामेव दीव्यति॥ इति॥ ५४॥

**अतः प्रकटलीलायां व्रजात्कृष्णः पुरं गतः।**

**द्वारकाञ्चेति सर्वेषु पुराणेषु विनिश्चितमिति॥ ५५॥**

यथा श्रीकृष्णामृते (७४२-४३)

अथ प्रकटरूपेण कृष्णो मधुपुरीं गतः।
व्रजेशजत्वमाच्छाद्य स्वां व्यञ्जन् वासुदेवताम्॥ ५६॥
यो वासुदेवो द्विभुजस्तथा भाति चतुर्भुजः।
तास्ता मधुपुरीलीलाः प्रकटय्य यदूद्वहः॥ ५७॥
द्वारवत्यां तथा याति तां तां लीलां प्रकाशयन्॥ इति॥ ५८॥

**व्रजे प्रकटलीलायां कृष्णेन विरहोऽभवत्।**
**त्रीन् मासान् व्रजलोकानामिति शास्त्रेषु निश्चितम्॥ ५९॥**

तद्यथा तत्रैव (७४६)

व्रजे प्रकटलीलायां त्रीन् मासान् विरहोऽमुना॥ इति॥ ६०॥

**विरहेऽपि च विस्फूर्तिः प्रादुर्भावोपमा हरेः।**
**त्रिमास्याः परतस्तेषां साक्षात् कृष्णेन सङ्गतिः॥ ६१॥**

तद्यथा तत्रैव (७४६-७६८)

तत्राप्यजनि विस्फूर्तिः प्रादुर्भावोपमा हरेः।
त्रिमास्याः परतस्तेषां साक्षात् कृष्णेन सङ्गतिः॥ ६२॥
आविर्भावागतिभ्यां सा द्विप्रकारास्य सम्भवेत्॥ ६३॥

तत्राविर्भावः

वैश्लेषिकक्लमोद्रेकविवशीकृतचेतसाम्।
प्रेष्ठानां सहसैवाग्रे व्यग्रः प्रादुर्भवेदसौ॥ ६४॥
उद्धवात्कृष्णसन्देश एभिर्यदवधि श्रुतः।

प्रादुर्भावस्तदवधि स्याद्व्रजे वनमालिनः॥ ६५॥
व्रजे द्वारवतीस्थस्य प्रादुर्भावो मुरद्विषः।
बृहद्विष्णुपुराणादावसकृद्बहुधोच्यते॥ ६६॥
व्रजे विहरमाणेऽस्मिन् प्रादुर्भूय हरौ तदा।
भवेत्तस्य पुरे यात्रा स्वप्नवद्व्रजवासिनाम्॥ ६७॥

अथागमनम्

प्रेम सन्दर्शयन् स्वेषु स्ववचः सत्यताञ्च सः।
पुनः प्रियं हरिर्गोष्ठंआगच्छति रथादिना॥ ६८॥

स्ववचो यथा श्रीदशमे (१०.३९.३५)

तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः।
सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः॥ ६९॥

तथा तत्रैव (भाः १०.४५.२३)

यात यूयं व्रजं तात वयञ्च स्नेहदुःखितान्।
ज्ञातीन् वो द्रष्टुमिच्छामो विधाय सुहृदां सुखं॥ इति॥ ७०॥
निजप्रियतमस्यापि वचसा यदुमन्त्रिणः।
एतदेव वचः स्वीयं पुनस्तेनोज्ज्वलीकृतम्॥ ७१॥

यथा तत्रैव (भाः १०.४६.३५)

हत्वा कंसः रङ्गमध्ये प्रतीपं सर्वसात्वताम्।
यदाह वः समागत्य कृष्णः सत्य,म् करोति तत्॥ इति॥ ७२॥
तत्सत्यता प्रकटिता द्वारकावासिनां गिरा॥ ७३॥

यर्ह्यम्बुजाक्षापससार भो भवान्
कुरून् मधून् वाथ सुहृद्दिदृक्षया।

तत्राब्दकोटिप्रतिमः क्षणो भवेत्
रविं विनाक्ष्नोरिव नस्तवाच्युत॥ इति॥ ७४॥

अत्र कारिके

भो अम्बुजाक्ष सुहृदां नन्दादीनां दिदृक्षया।
भवानपससारास्मानपहाय गतो मधून्॥ ७५॥
मथुरामिति विस्पष्टं मथुरामण्डलए व्रजम्।
तदानीं सुहृदां तत्र मधुपुर्यामभावतः॥ ७६॥

किञ्च

रथेन मथुरां गत्वा दन्तवक्रं निहत्य च।
स्फुटं पद्मपुराणेऽस्य कृष्णस्योक्ता व्रजागतिः॥ ७७॥

तद्गद्यपद्यादि यथा (पाद्मोत्तर १४तमाध्याये)

कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य नन्दव्रजं गत्वा सोत्कण्ठौ पितरावभिवाद्याश्वस्य ताभ्यां साश्रुसेकमालिङ्गितः सकलगोपवृद्धान् प्रणम्याश्वास्य बहुरत्नवस्त्राभरणादिभिस्तत्रस्थान् सर्वान् सन्तर्पयामास।

कालिन्दीपुलिने रम्ये पुण्यवृक्षसमाचिते।
गोपनारीभिरनिशं क्रीडयामास माधवः॥ ७८॥
रम्यकेलिसुखेनैव गोपवेशधरः प्रभुः।
बद्धप्रेमरसेनात्र मासद्वयमुवास ह॥ इति॥ ७९॥
यद्युत्तीर्येत्युत्तरणं तदा प्लवनमुच्यते।
दुष्टं हत्वा व्रजे यानं स्नानपूर्वमिहोचितम्॥ ८०॥
अतः प्रकटलीलायामप्ययोगोऽल्प एव हि।
इति धामत्रये कृष्णो विहरत्येव सर्वदा॥ ८१॥

व्रजागमनकाले च पाद्मोक्तेऽन्यच्च वर्तते॥ ८२॥

यथा तत्रैव पाद्मोत्तरखण्डे (९४तमाध्याये)

अथ तत्रस्था नन्दगोपादयः सर्वे जनाः पुत्रदारादिसहिताः पशुपक्षिमृगादयश्च श्रीवासुदेवप्रसादेन दिव्यरूपधरा विमानारूढाः परमं वैकुण्ठलोकमवापुः॥ इति।